विश्वशान्तये संस्कृतस्य उपयोगिता

पूर्णप्रसाद ब्राम्हणः

त्रास्यन् विश्वं मिथोवैरात् निर्देयन्नेकनीडताम्

अर्वाग् वीरो मनीषी कः संस्कृतं ह्युद्धरिष्यति ?

लेखकः—

विश्शान्तये संस्कृतस्य उपयोगिता

किंनिमित्तोऽयं प्रचारः संस्कृतस्य, किं तोष्टूयतेऽस्य महिमानं मनीषिगणः ? कैर्वा गुणगणैः अतिशेते इतरभाषाः संस्कृतभाषा ? ननु का नाम प्रयोजनीयताऽद्य संस्कृतभाषायाः ? संभवन्त्येवं प्रश्नोपप्रश्नाः । परम अस्य समुचितमुत्तरं वर्तमानयुगस्य व्यक्तिव्यक्तीनां, समाजसमाजानां, राष्ट्रराष्ट्राणां मिथो घटमानाः घटनाः, तास्ताः परिस्थितय एव वा नीरवं वितरन्ति ।

अद्य विश्वमेकतो ज्वलदुल्मुकेनेव नयेन शोषयन्नस्ति धनवादः । अन्यतो मन्दं मन्दं दशन्नस्ति सविषो विषधर इव यथावसरं गूढपादः साम्राज्यवादः । यतप्रतिक्रिया—उत्तरोत्तरम विश्वजनजीवनम क्लेशयति बुभुक्षा, परिहसति नग्नता, अवधीरयति आमयः । नहि नग्नो, बुभुक्षितो जनसाधारणः समीक्षते कर्तव्यमकर्तव्यं वा ! यत एव वर्धतेतराम् विश्वस्मिन् उत्तरोत्तरम् दुर्निवाराऽत्याचारपरंपरा । विध्वस्तो धर्मः, प्रतिहतो विवेकः, नष्टो न्यायः, गता मिथो बन्धुता, अवमानिता मानवता ! किं राष्ट्राणि, किं समाजाः, किं व्यक्तयः—सर्वत्र मिथोऽस्ति विजृम्भितोऽन्तः कलहः, स्पर्धा, प्रतिशोधश्च । सर्वत्र दानव्या एव भावनाया अस्ति प्राज्यम् साम्राज्यम,

सर्वत्र हिंसाया एवाऽस्ति कटुतरोऽट्टहासः। क्षणिकेऽपि जीवने नहि कश्चिदपि कंचित् क्षणं शान्तिमयं श्वसिति विनाऽर्तचीत्कारेण हृदयस्य।

निःशेषयितुमेतादृशं दानवीयं वातावरणम्, स्रष्टुं च पुनः शान्त-स्वस्थं अहिंसकम् अशोषकं च नवं वातावरणम्, स एव स्वर्ण-सन्देशः अस्माभिः प्रसारणीयः कोणकोणेषु विश्वस्य, यतो विश्वमा-नवेषु मिथो बन्धुता सृज्येत, एकता प्रकल्प्येत, विश्वशान्तिरुत्पद्येत! तदर्थमेव वयं भगवतीं संस्कृतभाषाम् अद्य भावयामः, या खलु विशाले मर्त्यजगति प्रथमं ज्ञानालोकं विततार। यत्र विश्वशान्तेः एवाऽस्ति मधुरः संकेतः— 'यत्र विश्वं भवत्येकं नीडम्'। यतोऽयमेवास्ति ऐदंयुगीनो द्रढीयान् 'प्रश्नो यत्-विश्वशान्तिः कथं प्रतिष्ठाप्या ? किं वा तदुपयुक्तम् अनन्यतमं साधनम् इति'। तथा विश्वशान्तेः इतिकर्तव्यताप्रश्नानुप्रसंगे एतदपि प्रथमं विचारणीयं भवति-'विश्वशान्तेः प्रतिबन्धका भावाः के के वा सन्तीति'। तत्र मुख्यतया राजनीतिकाःसंप्रदाया,ःधार्मिकाः संप्रदायाः, शोषणम्, सामाजिको भेदश्चेति भावचतुष्टयम् धीगोचरम् भवति। यस्य विरोधे संस्कृतभाषाया एवाऽस्ति सर्वप्रथमः प्रयासः। राजनीतिकाः संप्रदायाः विश्वमानवैकताम् नैव बाधेरन्निति सर्वकल्याणवादो घोषितः संस्कृतेन-'सर्वे भवन्तु सुखिनः इति'। तथा सर्वध-र्मान परित्यज्य एकस्मिन्नेव आत्मवादे संघटनाय गीतामुखेन आदिशता संस्कृतेन विश्वमानवैकताप्रत्यूहो धर्मसंप्रदाय-समूहो

हतवेगतां नीतोऽस्ति। श्रीमद्भागवतमुखेन—'न यस्य जन्म-कर्मभ्यां न वर्णाश्रमजातिभिः। सज्जतेऽस्मिन्नहंभावो देहे वै स मम प्रिय इति' ईश्वरप्रीत्यर्थे सामाजिकीम् उदारतां प्रति प्रेरयतः संस्कृतस्य विश्वैकताप्रतिबन्धः सामाजिको भेदो न संमत इति स्पष्ट-मवगम्यते। सर्वस्यापि जगतः ईशावास्यताम् बोधयत्, 'तेन त्यक्तेन एव भोगाय आदिशत्, मा गृधः कस्यस्विद्धनमिति च अध्यादिशत् संस्कृतम् शोषणस्य कियत् विरोधदस्तीति नैव प्रव-क्तव्यम्!

किञ्च—शोषणस्य विरोधे नैतावतैव तूष्णीं भवति संस्कृतम्, अपितु 'सर्वैरेव श्रमजीविकयैव वर्तितव्यम्' इति हि तस्य वज्र-गम्भीरो घोषः—'न ऋते श्रान्तस्य सख्याय देवाः'। एतावता ज्ञातुं पार्यते—किमस्ति संस्कृतभाषायामस्माकं श्रद्धातिशयः? का वा द्रढीयसी प्रयोजनीयताऽद्यत्वे तस्याः इति?।

किञ्च विश्वस्मिन् का वाऽपरा भाषा, या-सर्वभूतेषु चात्मानं, सर्वभूतानि चात्मनि-विलोक्य आत्यन्तिकं श्रेयः समर्जितुं सर्व-प्रथमं समदिशत? किमस्य संदेशस्य महिमा समृद्धैर्विश्वराज्यैरपि क्रेतुं शक्येत? पार्थिवो ध्वनिरेष किं वा स्वर्गीयः? वर्तमानं हि विश्वम् अस्ति व्याप्तम् सर्वत्र हिंसात्मकेन वातावरणेन। आराज-मारङ्कं च सर्वत्र प्रचलति मात्स्यो न्यायः। नहि निर्बलस्य कस्मै-चिदपि लाभाय सशैलवनकानना रत्नगर्भा विशालाऽपि भूमिः।

एतादृशेऽवसरे 'मा हिंस्यात् सर्वा भूतानीति' प्रचारयत् संस्कृतम् विश्वशान्त्यै कियदुपयुक्तं वर्वर्तीति नैव व्याख्यातव्यम् । नहि संस्कृतम् तत्र भगवतो हिरण्यगर्भस्य औरसान् पुत्रान् विश्वमानवान् मिथो युध्यमानान्, हतप्रतिहतान्, रक्तविलिप्तान् विलोकयितुं समीहते ।'सर्वे सन्तु निरामयाः'-इत्येव हि तस्य दिदृक्षा । यद्यपि कालप्रवाहेण बहुशः संजाताः खलु मानवजातीनां मिथः संग्रामसंघर्षाः । परं तेष्वपि न कश्चन व्यतिक्रमपक्षो गृहीतः संस्कृतेन । रामस्य, धर्मयुधिष्ठिरस्यैव, तथा एतादृशस्यैव वा धर्मन्यायवीरस्य पक्षे विजयाशंसा दर्शिता संस्कृतेन । प्राप्तेऽपि विजये, हिंसाया दुरुदर्कतां, नितान्तगर्हणीयतां च प्रबोधयता तेन नैव विजयोत्सवो हृदयेन स्वीकृतः । प्रत्युत त्रिलोककण्टकं रावणं निघ्नतः श्रीरामस्य, तथा असुरगणानिव कौरवान् विजितवतो धर्मयुधिष्ठिरस्य मुखतो युद्धोत्तरं गुरुसन्तापः पश्चात्ताप एव प्रकटीकृतः । युद्धरक्तरंजितम भारतेतिहासं वर्णयन् तत्र भगवान् बादरायणिः अशान्तात्मा अन्ते नारदोपदेशेन पुनरहिंसकं भागवतधर्मं व्याख्याय आत्मानं शान्तयति । एतावता स्पष्टीभवति ।—'संस्कृतम् जगति बद्धमूलं हिंसकं वातावरणं प्रशमय्य अहिंसकं प्रेममयं स्निग्धं वातावरणम् विष्वक् स्रष्टुं समीहते इति' । यत् विश्वशान्तये कियदुपयुज्येत, नैव विस्तरणीयम् ।

'भद्रं कर्णेभिः शृणुयामः' 'शं नो भवतु'— यत्रेदृक्षा एव सामुदायिक्यः कल्याणकामना उपलभ्यन्ते, यत्र व्यक्तिवादस्य

नास्ति कश्चन प्रश्रयः, यत्र क्रियमाणेषु निखिलेष्वपि कार्यजातेषु यज्ञीया (परोपकार) भावना निहिताऽस्ति—'यज्ञार्थात् कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः इति' तस्य संस्कृतस्य मधुमयो सन्देशनिवहो यदि आभुवनं प्रसार्येत ! लोके अन्यायस्य, अत्याचारस्य, हिंसायाः, प्रतिहिंसायाश्च भावनाः कर्हि, कथंकारं, क्व वा उत्पद्येरन्? तथात्वे को देशः परदेशं, कः समाजः परसमाजं विपक्षदृशा विलोकयेत ! 'मा नो द्विक्षत कंचन—' भगवत्याः सुरभारत्या भद्रदृशि सममेव एतत् दृश्यजगत् वर्वर्ति ईश्वरीयम्, पूजनीयम्, सेवनीयम् च—खं वायुमग्निं सलिलं महींच- नास्ति किमपि तस्य विद्वेष्यम नाम ?

भगवती संस्कृतमाता विभिन्नैः दार्शनिकैरपि स्वरैः तदेव अनुसन्दधाति, प्रतिपादयति च—कथंकारं जीवमात्रस्य हितम् भवति,कोऽस्ति मुक्तेरुपायः, कथं वा विश्वशान्तिः सेत्स्यतीति। सा हि वैशेषिकमुखेन मानवमात्रं धर्मकर्तव्यताम् अनुशास्ति विश्वशान्तये। न्यायदर्शनमुखेन च मानवमात्रस्य आत्यन्तिकसुखाय षोडशप्रमाज्ञानम्। क्वचित् सा वासनानाशो प्रकृतिर्बन्धाय न कल्पते इति-सांख्यमुखेन मोक्षमार्गं निर्दिशति। क्वचिच्च सा पूर्वमीमांसामुखेन शास्त्रस्य प्रबलनिष्ठाम् आधारीकृत्य अधर्मनिवृत्तिपूर्वकम् धर्मप्रवृत्तौ अधिकारिणश्चोदयति। तथैव सा क्वचित् वेदान्तमुखेन अधिकारिणः प्रबोधति—

'रज्जौ सर्पभ्रम इव विवर्तितो जगत्प्रतीतिः भवति, ऋते ज्ञानान्न मुक्तिरिति' च। सा पुनः काव्यक्षेत्रमवतीर्णा कविकुलकोमलकण्ठतः शिवेतरक्षतये नैकरसाः प्राञ्जलसूक्तीः गायति। विश्वशान्तिमेव कामयमाना नाटकान्ते भरतमुखात् मंगलप्रार्थनाः प्रस्तौति। कतमस्मिन् क्षेत्रे, कतमस्मिन् वा समये विरता विश्वशान्तिकामनाः तत्र भगवत्याः सुरभारत्याः?

यत् तत्वानभिज्ञा मुधाऽऽक्षिपन्ति, न तथा संस्कृतम् केवलं परोक्षफलायैव प्रेरयति मानवजगत्, अपितु संस्कृतम् इदमेव दृष्टं जगत् तावत् संमाष्टुं, परिवर्तयितुं, निर्मातुं च प्रेरयति, उत्साहयति—'उद्यानं ते पुरुष नावयानमिति, अभिवर्धताम् पयसाभिराष्ट्रेण वर्धताम् इति च।' या संस्कृतभाषा पुरुषार्थचतुष्टये अर्थकामौ प्रतिष्ठापयति, सा कथं दृश्यजगत् गजनिमीलिकया विलोकयेत? इयं सर्वभाषातिशायिनी विशेषता तु अस्त्येव अस्या यत्-प्रवृत्तिनिवृती द्वे एव पद्धती सा समानतया आश्रयति। भोगत्यागयोः द्वयोरेवाऽस्त्यस्याः समानः पक्षपातः। भोगे त्याग-बुद्धिः, त्यागे भोग-तृप्तिश्च इत्युभे हि देशने तस्याः। यस्या विश्वमानवमात्रेऽस्ति समानं वात्सल्यम्, अस्ति यस्या आप्तव्यं वस्तु परैव काऽपि दिव्यसत्ता, या हि नास्तिकानामास्तिकानां च विशाला वादभूमिः, याऽस्ति सहिष्णुताविशेषगुणा, या न कस्यचित् व्यक्तिविशे-

पस्य समाजविशेषस्य राष्ट्रविशेषस्यैव वा भाषा, यस्या विश्वराष्ट्र-भाषात्वे न प्राय: केषामपि वैमत्यम्, या च तैस्तैः सहिममयैः प्रगुणैः गुणैर्भावैश्च स्वयमर्हा, सा भगवती विश्वभाषासवित्री संस्कृतभाषा पुनर्युगोचितामुन्नतिं विकासं च प्रापिता यथा विश्वशान्तिं द्राक् उपस्थापयितुं कल्पेत, न तथाऽन्या दीनदीनाः, स्वल्पसाराः, स्वल्पलक्ष्याः विश्वस्य वर्गीया भाषाः। विश्वबन्धुतायाः, विश्वैकतायाः, विश्व-शान्तेश्च अग्रदूतिकाया तादृश्याः भगवत्याः सुरभारत्याः विश्वक् प्रचारं प्रसारं च को वा भविष्यद्‌र्शी विश्वनागरिको न कामयेत ! यस्या मधुमयी विश्वशान्तिगीतिः अतीताभ्यः अनन्त-शताब्दीभ्यः अविरलं गुञ्जति-'द्यौः शान्तिरन्तरिक्षं शान्तिः पृथिवी शान्तिः ...

सुगत प्रेस, तहाचल, काठमाडौं नेपाल ।